# ભારતવિજયસ્તોત્રમ્

Bharatavijayastotram

sanskritdocuments.org

February 19, 2019

# Bharatavijayastotram

# ભારતવિજયસ્તોત્રમ્

## Sanskrit Document Information

Text title : bhAratavijayastotram

File name : bhAratavijayastotram.itx

Category : devii

Location : doc_devii

Author : Maheshvaranandasarasvati

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brihat Stotra Ratnakar Shivadutta Shastri

Latest update : February 19, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 19, 2019

*sanskritdocuments.org*

# ભારતવિજયસ્તોત્રમ્

મઙ્ગલ્યોલ્લાસલીલઃ કરટ-મદનદી-સ્નાન-પાનપ્રમત્ત-
    શ્ચઞ્ચદ્ભિશ્ચઞ્ચરીકૈઃ કલિત-કલકલઃ સ્વસ્તિ-પુણ્યાહ્વઘોષૈઃ ।
દોર્દણ્ડૈરસ્ત્ર-શસ્ત્ર-પ્રહરણપટુભિર્જ્વાલ-માલા-જટાલૈઃ
    પ્રત્યૂહ-વ્યૂહહન્તા જનયતુ વિજયં કુઞ્જરગ્રામણીર્નઃ ॥ ૧॥

દિવ્યૈસ્તેજોભિરિદ્ધા પ્રબલ-ભુજવનોત્તાલ-કીલાયુધાઢ્યા
    સિંહસ્કન્ધાધિરૂઢા વિપુલબલ-વલદ્વાહિની-વ્યૂહભીમા ।
ગર્જાતર્જાઃ સૃજન્તી મહિષમરિચમૂં મથ્નતી રિષ્ટિવૃષ્ટ્યા
    તુષ્ટા સ્વેષ્ટા વિશિષ્ટા ઘટયતુ ઘટનાશ્ચણ્ડિકા નઃ પ્રચણ્ડા ॥ ૨॥

સઙ્કલ્પાનલ્પલીલા-ક્ષણ-ગણ-જનિતાનન્ત-સૃષ્ટિપ્રવાહઃ
    સર્વજ્ઞઃ સર્વશિક્તઃ શ્રુતનુતમહિમા મેદુર-શ્રીમનોજ્ઞઃ ।
લોકગ્રાસ-પ્રસક્ત -પ્રલય-ઘનઘટાટોપ-ઘોરાન્ મયાદીન્
    ધુન્વન્ ધ્વસ્તાન્ ધિનોતુ ધ્વનિત-જયરવૈર્ધૂર્ધરો ધૂર્જટીનઃ ॥ ૩॥

લોકાલોકાગ્રજાગ્રન્મદ મુદિર-મહાચણ્ડશૌણ્ડોગ્રદણ્ડઃ
    પ્રોદ્દણ્ડો દાનવેન્દ્રો વિજિતવસુમતીવૈભવઃ સ્વર્ણશય્યઃ ।
યત્તીવ્રાઘાતરૂક્ષા-ક્ષત-ખરનખરૈર્દીર્ઘનિદ્રાં સહેલં
    પ્રાપ્તઃ સોઽવ્યાજભવ્યઃ કલયતુ કુશલં ભારતસ્યાદ્યસિંહઃ ॥ ૪॥

સર્વાં સૃષ્ટિં સમસ્તાઞ્ જનગણનિકરાન્ વ્યશ્નુવાનં સમન્તાદ્
    ધ્વાન્ત વ્યાત્તાસ્યઘોરં મલિનિતજગતી-જાલમુદ્યન્ વિભિન્દન્ ।
તીવ્રૈ જાગ્રત્પ્રવેગૈર્જ્વલન-કણ-ગણોદ્ગગુણ-ગર્વૈરખર્વૈ-
    રુસ્રૈરશ્રાન્ત-નેમિર્દિશતુ વિજયિનીં સુશ્રિયં શ્રીરવિર્નઃ ॥ ૫॥

શ્રીમન્ ભૂતાધિનાથ-પ્રમથગણપતે સર્વશક્તે પુરારે
    સર્વોત્તુઙ્ગે હિમાદ્રે સુરુચિરશિખરે વૈજયન્તી જયન્તી ।
પ્રોચ્ચૈરુડ્ડીયમાના ચિરતરમહિમા ભારતીયા લસન્તીં
    પ્રાગ્વદ્ દોધૂયમાના વિહરતુ ગગને વિશ્વવન્દ્યાભિનન્દ્યા ॥ ૬॥

વેદાઃ શાસ્ત્રાણિ યાગાઃ શુચિરુચિરુચિરા આશ્રમા વર્ણભાગા-
    સ્તીર્થાન્યસ્વપ્નસૌધા જનગણવિતતા સંસ્કૃતિઃ સભ્યતા ચ ।
સમ્પૂર્ણો ધર્મરાશિઃ પ્રશમિતવિપુલાપત્તિરાષ્ટ્રં સમગ્રં
    વૃદ્ધિઃ સિદ્ધિઃ સમૃદ્ધિઃ સકલસુરપતેઽક્ષુણ્ણતાં નીયતાં નઃ ॥ ૭॥

સર્વાધિષ્ઠાનભૂમન્ ભરતભુવનિમાં વ્યોમયાનૈરસઙ્ખ્યૈઃ
    શસ્ત્રાસ્ત્રૈર્નૈકભેદૈરતુલિત-વિભવૈર્ઘોર-સામર્થ્ય-સાર્થૈઃ ।
દુર્ધર્ષા દુર્વિભેદ્યા કલિત-નવ નવોત્સાહપર્ણાભ્યુદીર્ણા
    સઙ્ખ્યાતીતાપ્રતૂર્ણ જયતુ ખલબલં વાહિની ભારતીયા ॥ ૮॥

દેશેઽસ્મિન્ દ્રાક્ સમસ્તે વિપુલ-જયરવો દુન્દુભિર્ધ્વાનધીરઃ
    યૂનામુત્સાહ-સિંહ-ધ્વનિભિરવિરતં શ્રૂયતાં શ્રીનિવાસ ।
કિઞ્ચાર્યાવર્ત-ભૂમિર્નિજ-વિજયલસત્ પ્રાજ્ય-સૌરાજ્યસિમ્નાં
    પૂર્ણાખણ્ડદ્યુતીનાં પ્રગુણિતગરિમા સ્યાત્ ખનિર્વર્ધિતાનામ્ ॥ ૯॥

ધ્વસ્તાનઃ શત્રવઃ સ્યુસ્ત્વરિતમિહસુખાઃ સન્તુ ગાવઃ સમગ્રાઃ
    સર્વે નાર્યો નરાશ્ચ પ્રમથિત-વિપુલાપત્તયઃ સન્તવદીનાઃ ।
ભૂમિઃ સસ્યાભ્યુદીર્ણા ખલ-બલજયિની વાહિની નોઽસ્ત્વજય્યા
    ભયાત્ ભૂયો ભવાનીપ્રભુરયમખિલાનુગ્રહે રક્ષકો નઃ ॥ ૧૦॥

સર્વૈર્નવ્યૈરસઙ્ખ્યૈર્ગુણગણ-ભરિતૈઃ સજ્જિતાનો યુવાનઃ
    સોત્સાહાઃ સઙ્ઘબદ્ધાઃ પ્રબલરિપુચમૂનાથલીલાવદાનાઃ ।
સઙ્ખ્યાતીતાઃ પતન્તઃ કરિનિકરદલત્ સિંહવિક્રાન્તવીર્યાઃ
    શ્રીનાથાનુગ્રહાત્તે વિજયમલમરં મોદમાના લભન્તામ્ ॥ ૧૧॥

ઇતિ કાશીપીઠાધીશ્વર-જગદ્ગુરુ-શઙ્કરાચાર્યસ્વામિ-
શ્રીમહેશ્વરાનન્દસરસ્વતીવિરચિતં૧ ભારતવિજયસ્તોત્રં સમાપ્તમ્ ।

(૧। ૨૦૧૯ સંવદિ ચીનાક્રમણાવસરે વારાણસેય-સંસ્કૃત-
વિશ્વવિદ્યાલયોપકુલપતિશ્રીસુરતિનારાયણમણિત્રિપાઠિમહોદયૈઃ
પ્રાર્થનયા સ્તોત્રમિદં વિરચિતમ્ । ન્યૂનાધિકભાવેન તત્રાઽન્યત્ર
ચ સંસ્કતસંસ્થાનેષુ પ્રાર્થનાયાં સુગૃહીતમભવત્ ।)

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Bharatavijayastotram*

pdf was typeset on February 19, 2019

Please send corrections to *sanskrit@cheerful.com*